# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०२ सेमेस्टर-०३** | **प्रश्नपत्रम्- ०८** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – CE 2.3.6 (OLD) | समयः –२:०० तः ०५:०० |
| दिनाङ्कः – १२/१२/२०१८ | ग्रन्थः – प्रतिष्ठामौक्तिकम् (शास्त्रार्थप्रकरणम्) | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु मन्त्रद्वयं ससन्दर्भं व्याख्येयम्।** १०

(१) यदाबध्नन् दाक्षायणा हिरण्यः शतानीकाय सुमनस्यमानाः।
तन्म आ बध्नामि शतशारदाया युष्माञ्जरदष्टिर्यथासम्॥

(२) इदं विष्णुर्विचक्रमे त्रेधानि दधे पदम्।
समूढमस्यपा॑सुरेस्वाहा॥

(३) ब्रह्मजज्ञानं प्रथमं पुरस्तत् द्विसीमतः सुरुचोवेनऽ आवः।
सबुध्न्या ऽउपमाऽ अस्यविष्ठाः सतश्चयोनिमसतश्चविवः॥

**प्रश्नः २ अधोस्तनाभ्यां प्रश्नमेकं सविस्तरं लिखित।** १०

(१) सर्वदेवप्रतिष्ठायां ग्राह्यवर्ज्यकालनिर्णयं यथाशास्त्रं कुरुत।

(२) समन्त्रकं कुटीरहोमं विलिख्य तस्य प्रयोजनं विवेचयत।

अथवा

लग्नशुद्धिविचारं विलिख्य अष्टोत्तरसहस्रकलशस्नपनविधिं निरूपयत।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु मन्त्रद्वयं ससन्दर्भं व्याख्येयम्।** १०

(१) हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्।
सदाधार पृथिवीन्द्या मुतेमां कस्मै देवाय हविषा विधेम॥

(२) आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः।
पितरं च प्रयन्त्स्वः॥

(३) स्थिरोभव वीडवङ्ग आशुर्भव वाज्यर्वन्।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः॥

**प्रश्नः ४ अधोलिखितयोः प्रश्नमेकं सविस्तरं वर्णयत।** १०

(१) दृष्टिपातेन आदर्शभङ्गरूपप्रपञ्चखण्डनपुरस्सरं नेत्रोन्मीलनम् यथाग्रन्थं वर्णयत।

(२) स्नपनवेदिकाविरचनपुरस्सरम् एकस्मिन् प्रासादे एकस्या एव प्रतिमायाः स्थापनविधिं यथाग्रन्थं वर्णयत।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेषु मन्त्रद्वयं ससन्दर्भं व्याख्येयम्।** १०

(१) समुद्रस्यत्वाऽवकयाग्ने परिव्ययामसि।
पावकोऽअस्मभ्य॑ शिवोभव॥

(२) मनो जूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमन्दधातु।
विश्वे देवासऽइहमादयन्तामों३ प्रतिष्ठ ॥

(३) अग्निदूतं पुरो दधे हव्यवाहमुप ब्रुवे
देवाँ३ आसादयादिह ॥

**प्रश्नः ६ अधोलिखितयोः प्रश्नमेकं सविस्तरं वर्णयत।** **१०**

(१) प्रतिमानां मण्डपप्रवेशनं विवर्ण्य शय्याधिवासञ्च ग्रन्थोक्तदिशा वर्णयत।

(२) हयग्रीवपञ्चरात्रोक्तसप्ताधिवाससंगतिं क्विण्य तत्त्वन्यासविचारान्,
निद्रावाहनवियारान् च निरूपयत।

**प्रश्नः ७ एकेन वाक्येनोत्तरं लिखत (दशैव)** **१०**

(१) प्राणप्रतिष्ठायां ॐ कतिवारम् उच्चारणीयम्?

(२) पूर्णाहूत्यां केन नाम्ना अग्निपूजा भवति?

(३) अधिवासप्रकाशः कति?

(४) निद्रावाहने कस्य सूक्तस्य पाठः कर्तव्यः?

(५) मूर्तेः दक्षिणहस्ते कंकणबन्धनस्य कः मन्त्रः?

(६) जलाधिवासात्पूर्वं मूर्तेः किं कर्तव्यम्?

(७) मण्डपवास्तुमण्डलम् कियत् पदं भवति?

(८) बलिदाने कस्य निषेधः वर्तते?

(९) वर्धिनीकलशस्थापना कुत्र करणीया?

(१०) मण्डपपूजायां ईशानपूर्वयोमध्ये कस्य देवस्य पूजनं भवति?

(११) कस्मिन् अयने प्रतिष्ठा कर्तव्या ?

(१२) सर्वदेवप्रियं मण्डलस्य नामधेयं किम्?

(१३) मधुपर्के कानि द्रव्याणि निक्षिप्तव्यानि?

(१४) प्राणप्रतिष्ठायां देवस्य दक्षिणकर्णे कस्य मन्त्रस्योच्चारणं कर्तव्यम्?

(१५) स्नपनविधौ कानि द्रव्याणि कलशे निक्षिप्तव्यानि?

***